इति रत्नमाला ॥ सुवहा ६ तालपत्रिका ७ गोधापदी ८ हेमपुष्पी ९ भूताली १० दीर्घकन्दिका ११ । अस्या गुणाः । मधुरत्वम् । प्रीतत्वम् । हृद्यत्वम् । पुष्टिबलकफप्रदत्वम् । पिच्छिलत्वम् । पित्तदाहश्रमहरत्वञ्च । इति राजनिर्घण्टः ॥ उष्णवीर्य्यत्वम् । बृंहणत्वम् । गुरुत्वम् । तिक्तत्वम् । रसायनत्वम् । गुदजरोगानिलनाशित्वञ्च । इति भावप्रकाशः ॥
"मुषली च द्विधा प्रोक्ता श्वेता चापरसंज्ञका ।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी ॥"
इति राजनिर्घण्टः ॥
(अस्या विषयो यथा, वैद्यकरसेन्द्रसारसंग्रहे ज्वरे महाराजवट्याम् ।
"माषद्वयमितं भागं तालमूल्या रसेन च ।
पिष्ट्वा च वटिका कार्य्या चतुर्गुञ्जाप्रमाणतः ॥")
ताललक्ष्मा, [न्] पुं, (ताल एव लक्ष्म चिह्नं यस्य ।) बलदेवः । इति हेमचन्द्रः । २।१३८॥
तालवृन्तं, क्ली, (तालस्य तालपत्रस्य वृन्तं कारणत्वेन अस्ति अस्य । अच् ।) व्यजनम् । इति हेमचन्द्रः । ३ । ३५१ । तालपातार पाखा इति भाषा ॥ (यदुक्तम्,—
"परे अङ्गानि विज्ञाते समस्तैर्नियमैरलम् ।
तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते ॥")
तस्य वायुगुणः । त्रिदोषशमनत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ (सोमविशेषे, पुं । यथा,—
"एक एव खलु भगवान् सोमः स्थाननामाकृतिवीर्य्यविशेषैश्चतुर्विंशतिधा भिद्यते ।"
"प्रतानवांस्तालवृन्तः करवीरोंऽशवानपि ॥"
इति सुश्रुते चिकित्सितस्थाने २९ अध्याये ॥)
तालवृन्तकं, क्ली, (तालवृन्तमेव । स्वार्थे कन् ।) व्यजनम् । इत्यमरः । २ । ७ । १४० ॥
तालवेचनकः, पुं, (तालस्य वेचनं पृथक्करणं संस्थानेन नियमनं यत्र । कप् ।) नटः । इति शब्दरत्नावली ॥ तालरेचनकोऽपि पाठः ॥
ताल्यं, त्रि, (तालोर्जातम् । तालु + "शरीरावयवात् यत् ।" ५ । १ । ६ । इति यत् ।) तालुजातम् । इति व्याकरणम् ॥ (यथा, शिक्षायाम् । १७ ।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥")
तालाख्या, स्त्री, (तालं तालपर्णं आख्या यस्याः ।) मुरा । इति शब्दचन्द्रिका ॥
तालाङ्कः, पुं, (तालस्तालवृक्षः अङ्कः ध्वजो यस्य ।) बलदेवः । इत्यमरः । १ । १ । २५ ॥ करपत्रम् । शाकभेदः । महालक्षणसम्पन्नपुरुषः । पुस्तकम् । हरः । इति हेमचन्द्रः ॥
तालावचरः, पुं, (तालेन अवचरति नृत्यतीति । अव + चर + अच् ।) नटः । इति त्रिकाण्डशेषः ॥
तालिः, स्त्री, (तालयति प्रतितिष्ठत्यनयेति । तल प्रतिष्ठायाम् + णिच् + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इतीन् ।) भूम्यामलकी । इति रत्नमाला । (ताड्यते निहन्यते मतिरनयेति । तड़ ताड़ने + णिच् + करणे इन् । डस्य लत्वम् ।) ताली । इत्यमरटीकायां भरतः ॥
तालिकः, पुं, (तलेन करतलेन निर्वृत्तः । तल + "तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) प्रसारिताङ्गुलिपाणिः । तत्पर्य्यायः । चपेटः २ प्रतलः ३ तलः ४ प्रहस्तः ५ तालः ६ । इति हेमचन्द्रः । ३ । २३० ॥ (यथा, पञ्चतन्त्रे । २ । १३७ ।
"यथैकेन न हस्तेन तालिका सम्प्रपद्यते ।
तथोद्यमपरित्यक्तं न फलं कर्म्मणः स्मृतम् ॥")
लिखितस्य निबन्धनम् । तत्पर्य्यायः । काचनी २ काचनकी ३ । इति शब्दरत्नावली ॥
तालिका, स्त्री, (तलेन निर्वृत्ता । तल + ठक् । स्त्रियां टाप् ।) चपेटः । तालमूली । इति शब्दरत्नावली ॥ ताम्रवल्ली । इति राजनिर्घण्टः ॥
तालितं, क्ली, (ताड्यते यदिति । तड़ ताड़ने + णिच् + क्तः । डस्य लत्वम् ।) वाद्यभाण्डम् । गुलितपटः । गुणः । इत्यजयः ॥
तालिशः, पुं, (तलतीति । तल गतौ + "इशः कप्यविड्भ्यस्तवेसु णित् ।" १ । १३९ । इत्युणादिकोषटीकाधृतसूत्रात् इशः णित्वात् वृद्धिश्च ।) पर्व्वतः । इत्युणादिकोषः ॥
ताली, स्त्री, (तालि + कृदिकारादिति वा ङीष् ।) ताड़ी । ताड़ियात् इति भाषा । तामलकी । इत्यमरः । २ । ४ । २२७ ॥ भूँइ आमला इति भाषा ॥ (अस्याः पर्य्याया यथा,—
"बहुपुष्पी जटाध्यक्षा ताली भूम्यामलक्यपि ।
तामलक्यजटा सूक्ष्मफला चैवामलक्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)
तुवरिका । इति शब्दरत्नावली ॥ तालमूली । इति रत्नमाला ॥ प्रविताली । कुञ्चिकाविशेषः । इति हेमचन्द्रः ॥ ताम्रवल्ली । इति राजनिर्घण्टः ॥ सुराभेदः । इति स्मृतिः ॥ ताड़ी इति भाषा ॥ (करास्फालनम् । यथा, अम्बाष्टके । ५ ।
"यालीभिरात्ततनुतालीं सलात् प्रियकपालीषु खेलति भयव्यालीनकुल्यासितचूलीभरा चरणधूलीलसन्मुनिवरा ॥")
तालीपत्रं, क्ली, (ताल्याः पत्रमिव पत्रमस्य ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥
तालीशं, क्ली, (तालीव श्यति नाशयति रोगानिति । शो नाशे + कः ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥
तालीशपत्रं, क्ली, (तालीशं रोगनाशकं पत्रं यस्य ।) वृक्षविशेषः । तत्पर्य्यायः । तालीशम् २ पत्राख्यम् ३ शुकोदरम् ४ धात्रीपत्रम् ५ अर्कवेधम् ६ करिपत्रम् ७ करिच्छदम् ८ नीलम् ९ नीलाम्बरम् १० तालम् ११ तालीपत्रम् १२ तमाह्वयम् १३ तालीशपत्रकम् १४ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । कफवातकासहिक्काक्षयश्वासच्छर्द्दिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । अरुचिगुल्मामवह्निमान्द्यनाशित्वञ्च । इति भावप्रकाशः ॥ भूम्यामलकी । इति मेदिनी । शे, ३०३ ॥
तालु, क्ली, (तरन्त्यनेन वर्णा इति । तॄ + "त्रोरश्च लः ।" उणां । १ । ५ । इति ञुण् रस्य लश्च ।) जिह्वेन्द्रियाधिष्ठानम् । यथा, श्रीभागवते ।
"मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ॥"
तेलुया इति टाकरा इति च भाषा ॥ तत्पर्य्यायः । काकुदम् २ । इत्यमरः । २ । ६ । ९१ ॥ तालुकम् ३ । इति राजनिर्घण्टः ॥
तालुजिह्वः, पुं, (तालु एव जिह्वा यस्य ।) कुम्भीरः । इति हेमचन्द्रः । ४ । ४१५ ॥
तालूरः, पुं, (तालयतीति । तल + णिच् + बाहुलकात् ऊरः ।) आवर्त्तः । इति हेमचन्द्रः । ४ । १४२ ॥
तावकीनं, त्रि, तव इदम् । (युष्मद् + "युष्मदस्मदोरन्यतरस्यां खञ्च ।" ४ । ३ । १ । इति खञ् । ततः "तवकममकावेकवचने ।" ४ । ३ । ३ । इति तवकादेशः ।) त्वदीयम् । इति व्याकरणम् ॥ तोमार एइ इति भाषा ॥
तावत्, व, (तत् परिमाणमस्य । तद्धिता इति बहुवचनेनाव्ययसंज्ञुक्ता अपि शापितास्तेन डावतुप्रत्ययः ।) साकल्यम् । अवधिः । मानम् । (यथा, कुमारे । ५ । ६७ ।
"त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ॥"
"तावत् इति मानार्थे यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः ।" इति तट्टीकायां मल्लिनाथः ॥) अवधारणम् । इत्यमरः । ३।३।२४५॥ (यथा, माघे । २ । ६३ ।
"इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः ॥")
प्रशंसा । पक्षान्तरम् । इति शब्दरत्नावली ॥ (तत्परिमाणमस्येति । "यत्तदेतेभ्यः परिमाणे वतुप् ।" ५ । २ । ३९ । इति वतुप् प्रत्ययेन तत्परिमाणे, त्रि । यथा, भागवते । ३।२६।१२ ।
"महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः ।
तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे ॥")
तावरं, क्ली, धनुर्गुणः । इति भूरिप्रयोगः ।
ताविषः, पुं, (तव्यते गम्यते सतुकर्म्मिभिरत्र । तव सौत्रो धातुः + "तवेर्णिद्वा ।" उणां । १ । ४९ । इति टिषच् स च णित् ।) स्वर्गः । समुद्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
ताविषी, स्त्री, (तवति सौन्दर्य्यं गच्छतीति । तव + टिषच् स च णित् । टित्वात् ङीप् ।) देवकन्या । नदी । पृथिवी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
तावीषः, पुं, (ताविष + पृषोदरादित्वात् दीर्घः ।) स्वर्गः । अम्बुधिः । काञ्चनम् । इति मेदिनी । षे, ३० ॥